ॐ तत्सद्ब्रह्मणे नमः ।

आत्मोपनिषत् ।

नारायणविरचितदीपिकासमेता ।

ॐ अथैवाङ्गिरास्त्रिविधः पुरुषस्तद्यथा बाह्यात्माऽन्तरात्मा परमात्मा चेति । त्वक्चर्मनखमांसरोमाङ्गुल्यङ्गुष्ठपृष्ठीवंशनखगुल्फोदरनाभिमेढ्रकट्यूरु कपोलभ्रुवौ ललाटबाहू पार्श्वशिरोधमनिकाक्षीणि श्रोत्राणि भवन्ति जायते म्रियते इत्येष बाह्यात्मा नाम ॥ १ ॥

अथान्तरात्मा नाम पृथिव्यप्तेजोवाय्वाकाशेच्छाद्वेषसुदुःखकाममोहविकल्पनादिभिः स्मृतिलिङ्ग उदात्तानुदात्तह्रस्वदीर्घप्लुतस्खलितगर्जितस्फुटितैर्मुदितनृत्यगीतवादित्रप्रलयविजृम्भितादिभिः श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः

आत्मत्रयीपराऽऽत्मोपनिषत्खण्डत्रयान्विता ।
अष्टाविंशी ग्रन्थसंघे शाखा शौनकवर्तिता ॥ १ ॥

पिण्डग्रहणे विरक्तस्य परमात्मानं बोधयितुं शाखाचन्द्रन्यायेनाऽऽत्मद्वयं निरूप्य निरञ्जनं संसारातीतं परमात्मानं निरूपयितुमिदमारभ्यते—अथैवाङ्गिरा इति । अथ ब्रह्मणा देवर्षीन्प्रति पिण्डनिरूपणानन्तरं तद्विमोक्षार्थोऽङ्गिरा उवाचेति शेषः । बाह्यात्मादयो वक्ष्यमाणलक्षणाः । जायते म्रियत इति प्रत्याहारेण षड्भावविकारा गृह्यन्ते यास्कोक्तास्ते यथा— "जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते नश्यति च" इति । ये च पञ्चविंशतिस्त्वगादयो भवन्ति षड्भावविकाराश्च स बाह्यात्मा नामेत्यन्वयः । चर्म त्वङ्मध्यभागः । नखानि हस्तपादभेदेन द्विरुक्तानि । पृष्ठी कट्यूर्ध्वभागः । मेढ्रं लिङ्गम् । ऊर्वन्तः समाहारद्वंद्वः । कपोलसहिते भ्रुवौ ललाटसहितौ बाहू पार्श्वादिसहितान्यक्षीणि चक्षूंषि ॥ १ ॥

पृथिव्यादिविजृम्भितादिपर्यन्तैरुपलक्षितो विज्ञानात्मा बुद्धिमयः कर्मसामान्यस्य श्रवणादिलक्षणं विशेषणं यः करोति सोऽन्तरात्मेत्यन्वयः । स्मृतिलिङ्गोऽन्यथाऽन्तः-

---

१ ख. त्वगस्थिमां° । २ ख. °सलोमाङ्गुष्ठ° । ३ ख. °ष्ठीवसन° । ४ क. °त एष । ५ क. °तनू° ।

पुराणं न्यायो मीमांसा धर्मशास्त्राणीति श्रवणघ्राणाकर्षणकर्मावि-
शेषणं करोत्येषोऽन्तरात्मा नाम ॥ २ ॥

अथ परमात्मा नाम यथाक्षरमुपासनीयः स च प्राणायामप्र-
त्याहारसमाधियोगानुमानाध्यात्माचिन्तकं वटकणिका श्यामाक-
तण्डुलो वालाग्रशतसहस्रविकल्पनादिभिर्न लभ्यते नोपलभ्यते।
नैं जायते म्रियते न शुष्यते न दह्यति न कम्पते न भिद्यते न
च्छिद्यते निर्गुणः साक्षी भूतः। शुद्धो निरवयवात्मा केवलः
सूक्ष्मो निष्कलो निरञ्जनो निरभिमानः शब्दस्पर्शरसरूपगन्धव-
र्जितो निर्विकल्पो निराकाङ्क्षः सर्वव्यापी सोऽचिन्त्योऽवर्ण्यश्च

करणं विना बाल्ये दृष्टं यौवने न स्मरेत्परिणामवशेन पिण्डभेदात्। स्वरितस्तूदात्ता-
नुदात्तयोरेवान्तर्भूतः " तस्याऽऽदित उदात्तमर्धह्रस्वम् " शेषमनुदात्तमिति स्मरणात्ते-
नात्रानुपात्तः। ह्रस्वादयः स्वरधर्माः स्खलितादयो वर्णदोषाः ॥ २ ॥

ननु परमात्मा वाङ्मनोगोचरातीतत्वात्कथं ज्ञेय इत्याशङ्क्याऽऽह—यथेति। यथा-
क्षरं यथोपदेशमुपास्यो ज्ञेयं तं त्वौपनिषदं पुरुषं पृच्छामीति तस्य वेदैकगम्यत्वावगमात्।
मनसैवानुद्रष्टव्यमिति श्रुतेरसंस्कृतेन मनसाऽग्राह्यत्वात्तत्संस्कारानाह—प्राणायामेति।
प्राणायामादिभिर्योगैरनुमानेन वाऽध्यात्मचिन्तकं प्रति प्रकाशत इति शेषः। नन्वसौ
विश्वभूर्विश्वेभ्योऽधिकप्रमाणः कथमप्रत्यक्ष इत्याशङ्क्याऽऽह—वटकणिकेति। यथा
वटकणिका वटबीजं सूक्ष्माऽपि महान्तं वटं सूत एवमसौ सूक्ष्मोऽपि न सूते श्यामाक-
तण्डुलः सूक्ष्मोऽपि महास्तम्बं सूते तद्वदसावित्यर्थः। ननु बीजवर्त्तिव्यक्तीनां प्रत्यक्षोऽपि
किं न स्यादत आह—वालेति।

" वालाग्रशतभागस्य शतधा कल्पितस्य च।
भागो जीवः स विज्ञेयः स चाऽऽनन्त्याय कल्पते " ॥

इति श्रुतेरतिसूक्ष्मत्वात्सर्वथाऽप्रत्यक्ष इत्यर्थः। न लभ्यते नेन्द्रियैर्नोपलभ्यते ज्ञाने-
न्द्रियैः। जन्ममरणशोकक्लेददाहकम्पभेदच्छेदनिषेधैः क्रियामात्रं निषिद्धम्। निर्गुण
इति गुणमात्रम्। साक्षी साक्षाद्द्रष्टा। भूतः सिद्धः। शुद्धः सहजमलरहितः। निरवय-
वात्मा स्वावयवभेदशून्यः। केवलः सजातीयविजातीयभेदशून्यः। सूक्ष्मो दुर्लक्षः।
निष्कलः षोडशकलारहितः। निरञ्जन आगन्तुकमलरहितः। निरभिमानोऽहंकारदोषर-
हितः। शब्देति। बाह्येन्द्रियदोषरहितः। निर्विकल्पो मनोदोषरहितः। निराकाङ्क्ष
आशादिबुद्धिदोषरहितः। ननु सूक्ष्मश्चेत्कथमाकाशादीनामात्मप्रसाद इत्यत आह—
सर्वव्यापीति। अत एव वालाग्रादिकल्पनाभिरित्युक्तम्। वस्तुतस्त्वणुमहत्त्वादि-

---

१ ख, °ग्राक । २ क. न भ्रि° । ३ क. °ते भि° । ४ ग. दुर्लभः।

पुनात्यशुद्धान्यपूतानि निष्क्रियः संस्कारो नास्ति संस्कारो
नास्त्येव परमात्मा पुरुषो नाम ॥ ३ ॥

इत्यथर्ववेदे आत्मोपनिषत्समाप्ता ॥ ५ ॥

परिणामरहित एव स्वमहिम्ना सर्वं व्याप्नोति कारणत एव स ईश्वरोऽचिन्त्योऽवर्ण्यश्च। अशुद्धानि चाण्डालदन्यपूतानि पापादिदुष्टानि सत्त्वानि निष्क्रियेऽपि ध्यानस्थः पुनाति। यद्ध्यानशास्त्रे ज्ञानलाभे चतुर्थ उक्तः शरीरान्तःकरणजीवपरमात्मभेदेन तथाऽपि जीवपरमात्मनोरभेदमाश्रित्येह विवेचेकः।

तदुक्तं गीतासु—

" द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः " इति।

इदमात्मचतुष्टयं प्रणवस्याक्षरोक्षरमक्षरात्परं बिन्दुनादशक्तिशान्तस्थूलसूक्ष्मचतुष्टयात्मकं द्रष्टव्यम्। संस्कारः पूर्वेष्टा स नास्ति। स्वतोऽसङ्गत्वात्। द्विरुक्तिः समाप्त्यर्था ॥ ३ ॥

नारायणेन रविणा श्रुतिमात्रेणविना।
अस्पष्टदृक्कमनमात्मोपनिषदीपिका ॥ १ ॥

इति श्रीनारायणविरचितवेदान्तकेसरिआत्मोपनिषदीपिका समाप्ता ॥ ७ ॥

---

१ ब. °दस्का°।